# Shri Venkateshvaranavaratnamalikastutih

# શ્રીવેઙ્કટેશ્વરનવરત્નમાલિકાસ્તુતિઃ

## Document Information

Text title : shrIveMkaTeshvaranavaratnamAlikAstutiHm

File name : shrIveMkaTeshvaranavaratnamAlikAstutiH.itx

Category : vishhnu, venkateshwara, stotra, nava, vishnu

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : April 4, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીવેઙ્કટેશ્વરનવરત્નમાલિકાસ્તુતિઃ

શ્રીમાનમ્ભોધિકન્યાવિહરણભવનીભૂતવક્ષઃપ્રદેશઃ
ભાસ્વદ્ભોગીન્દ્રભૂમીધરવરશિખરપ્રાન્તકેલીરસજ્ઞઃ ।
શશ્વદ્બ્રહ્મેન્દ્રવહ્નિપ્રમુખસુરવરારાધ્યમાનાઙ્ઘ્રિપદ્મઃ
પાયાન્માં વેઙ્કટેશઃ પ્રણતજનમનઃકામનાકલ્પશાખી ॥ ૧॥

યસ્મિન્ વિશ્વં સમસ્તં ચરમચરમિદં દૃશ્યતે વૃદ્ધિમેતિ
ભ્રશ્યત્યન્તે ચ તાદૃગ્વિભવવિલસિતસ્સોઽયમાનન્દમૂર્તિઃ ।
પદ્માવાસામુખામ્ભોરુહમદ ધુ મધુવિદ્ધિભ્રમોન્નિદ્રચેતાઃ
શશ્વદ્ભૂયાદ્વિનમ્રાખિલમુનિનિવહો ભૂયસે શ્રેયસે મે ॥ ૨॥

વન્દે દેવં મહાન્તં દરહસિતલસદ્વક્ત્રચન્દ્રાભિરામં
નવ્યોન્નિદ્રાવદાતામ્બુજરુચિરવિશાલેક્ષણદ્વન્દ્વરમ્યમ્ ।
રાજન્માર્તાણ્ડતેજઃપ્રસિતશુભમહાકૌસ્તુભોદ્ભાસ્યુરસ્કં
શાન્તં શ્રીશઙ્ખચક્રાદ્યમલકરયુતં ભવ્યપીતામ્બરાઢ્યમ્ ॥ ૩॥

પાયાદ્વિશ્વસ્ય સાક્ષી પ્રભુરખિલજગત્કારણં શાશ્વતોઽયં
પાદપ્રહ્વાઘરાશિપ્રશમનનિભૃતામ્ભોધરપ્રાભવો મામ્ ।
બ્યક્તાવ્યક્તસ્વરૂપો દુરધિગમપદઃ પ્રાક્તનીનાં ચ વાચાં
ધ્યેયો યોગીન્દ્રચેતસ્સરસિજનિયતાનન્દદીક્ષાવિહારઃ ॥ ૪॥

આદ્યં તેજોવિશેષૈરુપગતદશદિઙ્મણ્ડલાભ્યન્તરાલં
સૂક્ષ્મં સૂક્ષ્માતિરિક્તં ભવભયહરણં દિવ્યભવ્યસ્વરૂપમ્ ।
લક્ષ્મીકાન્તં ખગેન્દ્રધ્વજમઘશમનં કામિતાર્થૈકહેતું
વન્દે ગોવિન્દમિન્દીવરનવજલદશ્યામલં ચારુહાસમ્ ॥ ૫॥

રાકાચન્દ્રોપમાસ્યં લલિતકુવલયશ્યામમમ્ભોજનેત્રં
ધ્યાયામ્યાજાનુબાહું હલનલિનગદાશાર્ઙ્ગરેખાઞ્ચિતાઙ્ઘ્રિમ્ ।
કારુણ્યાઞ્ચત્કટાક્ષં કલશજલધિજાપીનવક્ષોજકોશા-
શ્લેષાવાતાઙ્ગરાગોચ્છ્રયલલિતનવાઙ્કોરુવક્ષસ્સ્થલાઢ્યમ્ ॥ ૬॥

શ્રીમન્સંપૂર્ણશીતદ્યુતિહસનમુખં રમ્યબિમ્બાધરોષ્ઠં
ગ્રીવાપ્રાલમ્બિવક્ષસ્સ્થલસતતનટદ્વૈજયન્તીવિલાસમ્ ।
આદર્શૌપમ્યગણ્ડપ્રતિફલિતલસત્કુણ્ડલશ્રોત્રયુગ્મં
સ્તૌમિ ત્વાં દ્યોતમાનોત્તમમણિરુચિરાનલ્પકોટીરકાન્તમ્ ॥ ૭॥

સપ્રેમૌત્સુક્યલક્ષ્મીદરહસિતમુખામ્ભોરુહામોદલુભ્યન્-
મત્તદ્વૈરેફવિક્રીડિતનિજહૃદયો દેવદેવો મુકુન્દઃ ।
સ્વસ્તિ શ્રીવત્સવક્ષાઃ શ્રિતજનશુભદઃ શાશ્વતં મે વિદધ્યાત્
ન્યસ્તપ્રત્યગ્રકસ્તૂર્યનુપમતિલકપ્રોલ્લસત્ફાલભાગઃ ॥ ૮॥

શ્રીમાન્ શેષાદ્રિનાથો મુનિજનહૃદયામ્ભોજસદ્રાજહંસઃ ।
સેવાસક્તામરેન્દ્રપ્રમુખસુરકિરીટાર્ચિતાત્માઙ્ઘ્રિપીઠઃ ।
લોકસ્યાલોકમાત્રાદ્વિહરતિ રચયન્ યો દિવારાત્રલીલાં
સોઽયં માં વેઙ્કટેશપ્રભુરધિકકૃપાવારિધિઃ પાતુ શશ્વત્ ॥ ૯॥

શ્રીશેષશર્માભિનવોપવલૃપ્તા
પ્રિયેણ ભક્ત્યા ચ સમર્પિતેયમ્ ।
શ્રીવેઙ્કટેશપ્રભુકણ્ઠભૂષા
વિરાજતાં શ્રીનવરત્નમાલા ॥ ૧૦૦ ।
॥ ઇતિ શ્રીવેઙ્કટેશ્વરનવરત્નમાલિકાસ્તુતિઃ સમાપ્તા॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com
From a telugu book veNkaTeshakAvyakalApa

*Shri Venkateshvaranavaratnamalikastutih*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*